विष्णुसहस्रनाम



विष्णुसहस्रनामबहुतशुद्धतासे



मन्नूलालपन्नालालस्टीमप्रेसमिर्जापुरकेछपा॥

वि॰ ॥श्रीगणेशायनमः॥ ॐयस्यस्मरणमात्रेण जन्मसंसार
१ बन्धनात् विमुच्यते नमस्तस्मै विष्णवे प्रभ विष्णवे न
मः समस्तभूतानामादिभूताय भूभृते अनेकरूपरूपाय
विष्णवे प्रभविष्णवे १ वैशंपायनोवाच श्रुत्वाधर्म्मानशे
षेणपावनानिच सर्वशः युधिष्ठिरः शान्तनवं पुन
रेवाभ्यभाषत २ युधिष्ठिरउवाच किमेकं दैवतं लो
के किंवाप्येकंपरायणं स्तुवन्तः कं कमर्चन्तःप्राप्नुयु
र्मानवाःशुभम् ४ कोधर्मः सर्वधर्म्माणां भवतः प॰
परमो मतः किंजपन्मुच्यते जन्तुर्जन्मसंसारबंध १

वि० नात् ५ भीष्म उवाच जगत्प्रभुं देवदेव मनंतं पुरु

१ षोत्तमं स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः

४ ६ तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययं ध्यायं

स्तुवन्नमस्यंश्च यजमानस्तमेव च ७ अनादिनिध

नं विष्णुं सर्वलोकमहेश्वरं ॥ लोकाध्यक्षं स्तुवन्नि

त्यं सर्वदुःखातिगो भवेत् ८ ब्रह्मण्यं सर्वधर्मज्ञं

लोकानां कीर्तिवर्द्धनं लोकनाथं महद्भूतं सर्वभूतभ

वोद्भवं ९ एषमे सर्वधर्माणां धर्मोधिकतमोमतः वि०

यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा १० परमं यो २

कि महत्तेजः परमं यो महत्तपः परमं यो महद्ब्रह्म परमं यः

४ परायणं ११ पवित्राणां पवित्रं यो मंगलानां च मंगलं

८ दैवतं देवतानां च भूतानां योव्ययः पिता १२ यतः

सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्रल

यं यांति पुनरेव युगक्षये १३ तस्य लोकप्रधानस्य जग

न्नाथस्य भूपते विष्णोर्नामसहस्रं मे श्रृणु पापभया

पहं १४ यानि नामानि गौणानि विख्यातानि महात्मनः

ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये १५ ऋषिर्नाम्नां वि॰

सहस्रस्य वेदव्यासो महामुनिः छंदोनुष्टुप् तथा देवो ४

वि० भगवान्देवकीसुतः ९६ ओंविष्णुजिष्णुमहाविष्णुप्रभ
५ विष्णुमहेश्वरं अनेकरूपदैत्यान्तंनमामिपुरुषोत्त
८ मं ९७ श्रीवेदव्यासउवाच ओं अस्य श्रीविष्णोर्दिव्य
सहस्रनामस्तोत्रमालामंत्रस्य श्रीभगवान्वेदव्यास
ऋषिरनुष्टुप्छंदः श्रीविष्णुपरमात्मा देवता देवकीनं
दनः स्रष्टेति शक्तिः आत्मयोनिः स्वयंजातइतिबीजं
उद्भवःक्षोभणोदेव इतिमंत्रः शंखभृन्नंदकीचक्रीति
कीलकं त्रिसामासामगःसाम इतिकवचं शार्ङ्गधन्वा शि०
गदाधर इत्यस्त्रं ओंविष्णुविष्णुर्वषट्कारइतिध्यानं ६०

३१

वि॰ श्रीविष्णोः प्रीत्यर्थे दिव्यसहस्रनामजपे विनियोगः ॐ
६ विश्वं विष्णुर्वषट्कार इत्यंगुष्ठाभ्यां नमः अमृतांशूद्भ
५ वो भानुरिति तर्जनीभ्यां नमः ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति
मध्यमाभ्यां नमः सुवर्णबिन्दुरक्षोभ्य इत्यनामिकाभ्यां
नमः आदित्यो ज्योतिरादित्य इति कनिष्ठिकाभ्यां नमः
शार्ङ्गधन्वा गदाधर इति करतलकरपृष्ठाभ्यां नमः इति
करन्यासः ॐ विश्वं विष्णुर्वषट्कार इति हृदयाय नमः
अमृतांशूद्भवो भानुरिति शिरसे स्वाहा ब्रह्मण्यो ब्रह्मवि श्रि॰
द्ब्रह्मेति शिखायै वषट् शंखभृन्नंदकी चक्रीति कवच ❀ ६

वि० चायहुं उदीर्णे: सर्वेनप्रवृत्तु इति नेत्रत्रयाय वौषट् शा
८ र्ङ्गधन्वा गदाधर इत्यस्त्राय फट् इति अंगन्यासः श्रीवि
८ ष्णोर्दिव्य सहस्र नाम स्तोत्र जप महं करिष्येति संकल्प
ॐ विश्वं विष्णुर्ध्यानम् श्रीपुरुषोत्तमाराधने सर्व
पाप क्षयार्थे जपे विनियोगः अथ ध्यानं ॐ शान्ता
कारं भुजगशायनं पद्मनाभं सुरेशं विश्वाधारं गग
नसदृशं मेघवर्णं शुभांगं लक्ष्मीकांतं कमलनयनं
योगिभिर्ध्यानगम्यं वंदे विष्णुं भवभयहरं सर्वलोकै वि०
कनाथं १ ॐ विश्वं विष्णुर्वषट्कारो भूतभव्य। ८

वि० भवत्प्रभुः भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः १८
१० पूतात्मा परमात्मा च मुक्तानां परमा गतिः अव्ययः पुरु
४ षः साक्षी क्षेत्रज्ञोऽक्षर एव च १९ योगो योगविदां नेता
प्रधानपुरुषेश्वरः नारसिंहवपुः श्रीमान् केशवः
पुरुषोत्तमः २० सर्वः शर्वः शिवः स्थाणुर्भूतादि
र्निधिरव्ययः संभवो भावनो भर्ता प्रभवः प्रभुरी
श्वरः २१ स्वयंभूः शंभुरादित्यः पुष्कराक्षो महा वि०
स्वनः । अनादिनिधनो धाता विधाता ४ ८

वि० धातुरुत्तमः २२ अप्रमेयो हृषीकेशः पद्मनाभोऽमर
६ प्रभुः विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रु
१ वः २३ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्र
तर्दनः प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परम् ॥
२४ ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजाप
तिः हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः २५
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ॥ ए०
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्म २६ ॥ ६

वि० वान् २६ सुरेशः शरणं शर्मे विश्वरेताः प्रजाभवः ॥
१० अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः २७ अजः
१० सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः वृषाकपिर
मेयात्मा सर्वयोगविनिःसृतः २८ वसुर्वसुमना
सत्यः समात्मा संमितः समः ॥ अमोघः पुंडरीका
क्षो वृषकर्मा वृषाकृतिः २९ रुद्रो बहुशिरा बभ्रु
र्विश्वयोनिः शुचिश्रवाः अमृतः शाश्वतः स्थाणु
र्वरारोहो महातपाः ३० सर्वगः सर्वविद्भानुर्विष्वक्से वि०
नो जनार्दनः वेदो वेदविदव्यंगो वेदांगो वेदवित्कविः १०

वि० २१ लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः चतु
११ रात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः २२ भ्राजिष्णुर्भोजनं भो
क्ता सहिष्णुर्जगदादिजः अनघो विजयो जेता विश्वयोनिः
पुनर्वसुः २३ उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः
अतींद्रः संग्रहः सर्गो धृतात्मा नियमो यमः २४ वेद्यो वैद्यः स
दा योगी वीरहा माधवो मधुः अतींद्रियो महामायो महो
त्साहो महाबलः २५ महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्यु
तिः अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् २६ महे
ष्वासो महीभर्ता श्रीनिवासः सतां गतिः २७ मरीचिर्दम वि०
नो हंसः सुपर्णो भुजगोत्तमः हिरण्यनाभः सुतपाः प ११

वि० द्मनाभः प्रजापतिः ३८ अमृत्युः सर्वदृक्सिंहः संधा
१२ ता संधिमान्स्थिरः अजो दुर्मर्षणः शास्ता विश्रुता
त्मा सुरारिहा ३९ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्र
मः निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ४०
अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः सह
स्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात् ४१ आवर्त्तनोनि
वृत्तात्मा संवृतः संप्रमर्दनः अहः संवर्त्तको वह्निरनि
लो धरणीधरः ४२ सुप्रसादः प्रसन्नात्मा विश्वधृग् वि०
विश्वभुग्विभुः सत्कर्त्ता सत्कृतिः साधुर्जह्नुर्नाराय २१

वि० णोनरः ५३ असंख्येयो प्रमेयात्मा विशिष्टः शिष्ट
१३ कृच्छुचिः सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसा
धनः ५४ वृषाहीवृषभो विष्णुर्वृषपर्वा वृषोदरः ॥
वर्द्धनो वर्द्धमानश्च विविक्तः श्रुतिसागरः ५५ सुभुजो
दुर्द्धरो वाग्मी महेंद्रो वसुदो वसुः नैकरूपो बृहद्रूपः ।
शिपिविष्टः प्रकाशनः ५६ ओजस्तेजो द्युतिधरः प्रका
शात्मा प्रतापनः ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्क
रद्युतिः ५७ अमृतांशूद्भवोभानुः शशिबिंदुः सुरे
श्वरः औषधं जगतः सेतु । सत्यधर्म्मपराक्रमः

वि० ४८ भूतभव्यभवन्नाथपवनः पावनोनलः कामहा
२५ कामकृत्कांतः कामी कामप्रदः प्रभुः ४९ युगादिकृ
१९ द्युगावर्त्तो नैकमायो महाशनः अदृश्योव्यक्तरूपश्च
सहस्रजिदनंतजित् ५० इष्टोविशिष्टः शिष्टेष्टः शिखंडी
नहुषोवृषः क्रोधहा क्रोधकृत्कर्त्ता विश्वबाहुर्महीधरः
५१ अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ॥
अपांनिधिरधिष्ठानः मप्रमत्तः प्रतिष्ठितः ५२
स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ॥ वि०
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ५३ अशो २५

वि० कस्तारणस्तारः शूरः शौरिर्जनेश्वरः अनुकूलः शता
२५ वर्त्तः पद्मी पद्मनिभेक्षणः ५४ पद्मनाभोरविंदाक्षः
१७ पद्मगर्भः शरीरभृत महर्द्धिऋद्धोवृद्धात्मा महाक्षो
गरुडध्वजः ५५ अतुलः शरभो भीमः समयज्ञो हवि
र्हरिः सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिंजयः
५६ विक्षरोरोहितो मार्गो हेतुर्दामोदरः सह ॥ म
हीधरो महाभागो वेगवानमिताशनः ५७ उद्भवः क्षो
भणोदेवः श्रीगर्भः परमेश्वरः करणं कारणं कर्त्ता विकर्त्ता वि०
गहनोगुहः ५८ व्यवसायो व्यवस्थानः संस्थानस्थान १५

वि॰ रोध्रुवः परर्द्धिः परमस्पष्टः तुष्टः पुष्टः शुभेक्षणः
१६ रामो विरामो विरजो मार्गो नेयो नयो नयः वीरः शक्ति
14 मतां श्रेष्ठो धर्मो धर्मविदुत्तमः ९० वैकुंठः पुरुषः प्राणः
प्राणदः प्रणवः पृथुः हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायु
रधोक्षजः ९१ ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ९२ विस्ता
रः स्थावरः स्थाणुः प्रमाणं बीजमव्ययं अर्थो नर्थो
महाकोशो महाभोगो महाधनः ९३ अनिर्विण्णः स्थविष्ठो वि॰
भूर्धर्मयूपो महामखः नक्षत्रनेमिर्नक्षत्री क्षमः क्षा १६

वि० मः समीहनः ९५ यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतांगतिः वि०
१८ सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ९६ सुव्रतः सु-
१८ मुखः सूक्ष्मः सुघोषः सुखदः सुहृत् । मनोहरो जितक्रो-
धो वीरबाहुर्विदारणः ९७ स्वापनः स्ववशो व्यापी नैका-
त्मा नैककर्मकृत् वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्व-
रः ९८ धर्मगुप् धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ॥
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ९९ गभस्ति-
नेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः आदिदेवो महादेवो वि०
देवेशो देवभृद्गुरुः १०० उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पु- १८

वि० रातनः शरीरभूतभृद्भोक्ता कपींद्रो भूरिदक्षिणः ७० सो
१९ मपोमृतपः सोमः पुरुजित्पुरुषोत्तमः बिनयोजयः
सत्यसंधोदाशार्हः सात्वतांपतिः ७१ जीवोबिनयि
ताःसाक्षीमुकुंदोमितविक्रमः अंभोनिधिरनंतात्मा म
होदधिशयोंतकः ७२ अजोमहार्हः स्वाभाव्योजितामित्रः
प्रमोदनः आनंदोनंदनोनंदः सत्यधर्मात्रिविक्रमः ७३
महर्षीकपिलाचार्यः कृतज्ञोमेदनीपतिः त्रिपदस्त्रिदशा
ध्यक्षोमहाशृंगकृतांतकृत् ७४ महाबराहोगोविंदः सि०
सुषेणः कनकांगदी ॥ गुह्योगंभीरोगहनोगुप्तश्चक्रग १९

दाधरः ७५ वेधाः स्वांगोजितः कृष्णो दृढः संकर्षणोच्युतः
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ७६ भगवान् भ
गहानंदी वनमाली हलायुधः आदित्यो ज्योतिरादित्यः सहि
ष्णुर्गतिसत्तमः ७७ सुधन्वा खंडपरशु दारुणो द्रविणप्र
दः ॥ दिवस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः
७८ त्रिसामा सामगः साम निर्वाणं भेषजं भि
षक् संन्यासः कृच्छमः शांतो निष्ठा शांतिपरायणः
७९ शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः गोहितो
गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ८० अनिवर्ती निवृत्तात्मा सं

वि० क्षेप्ताक्षेमकृच्छिवः श्रीवत्सः वक्षा श्रीवास श्रीपतिः श्री
४० मतांवरः ८१ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीवि
प० भावनः श्रीधरः श्रीकरः श्रेयः श्रीमाल्लोकत्रयाश्रयः
विजितात्मा विधेयात्मासत्कीर्तिश्छिन्नसंशयः ८३ उदी
र्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः भूशयोभूषणोभू
तिर्विशोकः शोकनाशनः ८४ अर्चिष्मानर्चितः कुम्भो
विशुद्धात्माविशोधनः अनिरुद्धोप्रतिरथः प्रद्युम्नोमि
तविक्रमः ८५ कालनेमिनिहावीरः शूरः शौरिजनेश्वरः शि०
त्रिलोकात्मात्रिलोकेशः केशवः केशिहाहरिः ८६ कामदेवः २०

वि॰ कामपालः कामी कांतः कृतागमः अनिर्देश्यवपुर्विष्णुर्वीरो
२१ नंतो धनंजयः ८७ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः
५। ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ८८ महाक्र
मो महाकर्मा महातेजा महोरगः ॥ महाक्रतुर्महायज्वा
महायज्ञो महाहविः ८९ स्तव्यः स्तवप्रियः स्तोत्रं स्तु
तिः स्तोता रणप्रियः । पूर्णः पूरयिता पुण्यः पुण्यकीर्त्ति
रनामयः ९० मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ॥
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ सद्गतिः सत्कृतिः
सत्ता सद्भूतिः सत्परायणः शूरसेनो यदुश्रेष्ठः सन्निवासः सुया

वि॰ ९२ भूतावासो वासुदेवो सर्वासुनिलयोनलः दर्पहा दर्प
टी॰भा॰ दो दृप्तोदुर्द्धरोथापराजितः ९३ विश्वमूर्त्तिर्महामूर्त्तिर्दी
२२ प्तमूर्त्तिरमूर्त्तिमान् अनेकमूर्त्तिरव्यक्तः शतमूर्त्तिः शता
ननः ९४ एकोनैकः सवः कः किं यत्तत्पदमनुत्तमं लोक
बंधुर्लोकनाथो माधवो भक्तवत्सलः ९५ सुवर्णवर्णो
हेमांगो वरांगश्चंदनांगदी वीरहा विषमः शून्यो घृताशी
रचलश्चलः ९६ अमानी मानदो मान्यो लोकस्वामी त्रि
लोकधृक् सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ९७ ते वि॰
जोवृषो द्युतिधरः सर्वशस्त्रभृतांवरः प्रग्रहो निग्रहो व्यग्रो नैक २२

वि० २३ ५४

भृंगोगदाग्रजः ९८ चतुर्मूर्त्तिश्चतुर्वाहुश्चतुर्व्यूहश्चतुर्ग
तिः चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ९९ समाव
र्त्तोनिवृत्तात्मा दुर्जयो दुरतिक्रमः दुर्लभो दुर्गमो दुर्गो दुरा
वासो दुरारिहा १०० शुभांगो लोकसारंगः सुतंतुस्तंतुवर्द्धनः
इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः १ उद्भवः सुंदरः
सुंदो रत्ननाभः सुलोचनः अर्को वाजसनः शृंगी जयंतः
सर्वविज्जयी २ सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः
महाह्रदो महागर्तो महाभूतो महानिधिः ३ कुमुदः कुंदरः कुंदः
पर्जन्यः पावनोनिलः अमृतांशोमृतवपुः सर्वज्ञः सर्वतोमुखः वि०
४ सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः न्यग्रोधोदुं २१

वि॰ वरोम्बरस्य श्वाणरतान्त्रिनिषूदनः ५ सहस्रार्चिः सप्तजिह्वः
२४ सप्तैधाः सप्तवाहनः अमूर्त्तिर्निरघोचिंत्यो भयकृद्भयनाशनः
२८ ६ अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् अधृतः स्व
धृतः स्वास्यः प्राग्वंशो वंशवर्द्धनः ७ भारभृत्कथितो योगी
योगीशः सर्वकामदः आश्रमः श्रमणः क्षामः सुपर्णो वा
युवाहनः ८ धनुर्द्धरो धनुर्वेदो दण्डो दमयिता दमः अपरा
जितः सर्वसहो नियन्ता नियमो यमः ९ सत्ववान् सात्त्विकः
कः सत्यः सत्यधर्मपरायणः अभिप्रायः प्रियार्होर्हः प्रि
यकृत्प्रीतिवर्द्धनः १० विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग् वि॰
भुः रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ ११ ॥ २४

वि॰ अनंतो हुतभुग्भोक्ता: सुखदो नैकदोग्रजः अनिर्विण्णः स
२५ दामर्षी लोकाधिष्टानमद्भुतः ११ सनात्सनातनतमः कपि
१५ लः कपिरव्ययः स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्व
स्तिदक्षिणः १३ अरौद्रः कुंडली चक्री विक्रंयूर्जितशासनः।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः १४ अक्रूरः पेश
लो दक्षो दक्षिणः क्षमिणांवरः। विद्वत्तमो वीतभयः पुण्य
श्रवणकीर्तिनः १५ उत्तारणो दुः कृतिहा पुण्यो दुःस्वप्न
नाशनः वीरहा रक्षणः शंतो जीवन पर्यवस्थितः १६
अनंतरूपोनंतश्रीर्जितमन्युर्भयापहः ॥ चतुरस्रो गं
भीरात्मा विदिशो व्यादिशो दिशः १७ अनादिर्भूर्भुवो

३६८१
स्तो० ३

लक्ष्मीः सुवीरो रुचिरांगदः जननो जनजन्मादिर्भीमो भीम
पराक्रमः १८ आधारनिलयो धाता पुष्पहासः प्रजागरः ऊ
र्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः १९ प्रमाणं प्राण
निलयः प्राणभृत्प्राणजीवनः तत्त्वं तत्त्वविदेकात्मा जन्म
मृत्युजरातिगः २० भूर्भुवःस्वस्तरुस्तारः सविता प्रपिताम
ह यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः २१ यज्ञभृद्
ज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः यज्ञांतकृद्यज्ञगुह्यमन्न
मन्नाद एव च २२ आत्मयोनिः स्वयंजातो वैखानः सामगा
यनः देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः २३ शंखभृन्नं

दकी चक्री शार्ङ्गधन्वा गदाधरः रथांगपाणिरक्षोभ्यः सर्वप्रहर

णायुधः २४ इतीदं कीर्त्तनीयस्य केशवस्य महात्मनः ना
म्नां सहस्रं दिव्यानामशेषेण प्रकीर्त्तितं २५ य इदं शृणु
यान्नित्यं यश्चापि परिकीर्त्तयेत् २६ वेदान्तगो ब्राह्मणः
स्यात्क्षत्रियो विजयी भवेत् ॥ वैश्यो धनसमृद्धः स्याच्छू
द्रः सुखमवाप्नुयात् २७ धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चा
र्थमाप्नुयात् । कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजां
२८ भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः सहस्रं
वासुदेवस्य नाम्नामेतत्प्रकीर्त्तयेत् २९ यशः प्राप्नोति
विपुलं ज्ञातिप्राधान्यमेव च । अचलां श्रियमाप्नोतिनुत्त
मं ३० न भयं क्वचिदाप्नोति वीर्यं तेजश्च विंदति भवत्यरोगो

बि० २१रोगार्तोमुच्यतेरोगा द्बद्धोमुच्येतबंधनात् भयान्मुच्ये
२८ त् भीतस्तुमुच्येतापन्न आपदः २२दुर्गाण्यतितरत्याशुपु
४८ रुषःपुरुषोत्तमः स्तुवन्नामसहस्रेण नित्यंभक्तिसमन्वितः
२३वासुदेवाश्रयोमर्त्यो वासुदेवपरायणः सर्वपापविशु
द्धात्मा यातिब्रह्मसनातनं २४नवासुदेवभक्तानामशुभं
विद्यतेक्वचित् जन्ममृत्युजराव्याधिभयंनैवोपजायते २५
इमंस्तवमधीयानः श्रद्धाभक्तिसमन्वितः युज्येतात्मसु
खक्षांतिश्रीधृतिस्मृतिकीर्तिभिः २६नक्रोधोनचमात्सर्यंन
लोभोनाशुभामतिः भवंतिकृतपुण्यानां भक्तानांपुरुषोत्त बि०
मं२७द्यौःसचंद्रार्कनक्षत्रा खंदिशोभूर्महोदधिः वासुदेवस्य २९

वि०
२९
४१

वीर्येण विधृतानि महात्मनः ३८ ससुरासुरगंधर्वं सयक्षो
रगराक्षसं । जगद्वशे वर्ततेदं कृष्णस्य सचराचरं । इंद्रियाणि
मनो बुद्धिः सत्त्वं तेजो बलं धृतिः वासुदेवात्मकान्याहुः क्षेत्रं
क्षेत्रज्ञ एव च ४० सर्वागमानामाचारः प्रथमं परिकल्प
यते आचारः प्रभवो धर्मो धर्मस्य प्रभुरच्युतः ४१ ऋषयः पि
तरो देवा महाभूतानि धातवः जंगमाजंगमं चेदं जगन्नारायणो
द्भवं ४२ योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च वेदाः
शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ४३ एको विष्णु
र्महद्भूतं पृथग्भूतान्यनेकशः ॥ त्रिँल्लोकान्व्याप्य भूता वि०
त्मा भुंक्ते विश्वभुगव्ययः ४४ इमंस्तवं भगवतो विष्णो २९

वि॰ व्यासेन कीर्त्तितं पठेद्यइच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥
३० ४५ विश्वेश्वरमजं देवं जगतः प्रभुमव्ययं भजंति ये पुष्करा
४॰ क्षं न ते यांति पराभवं ४६ अर्जुन उवाच पद्मपत्रविशालाक्ष
पद्मनाभ सुरोत्तम भक्तानामनुरक्तानां त्राता भव जनार्दन ॥
४७ श्रीभगवानुवाच यो मां नामसहस्रेण स्तोतुमिच्छति
पांडवः सोहमेकेन श्लोकेन स्तुत एव न संशय ४८ ॐ नमो
स्त्वनंताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुबाहवे सह
स्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ४९
नमः कमलनाभाय नमस्ते जलशायिने नमस्ते केशवानंत
वासुदेव नमोस्तु ते ५० वासनाद्वासुदेवस्य वासितं भुवनत्र वि॰
यं सर्वभूतनिवासोसि वासुदेव नमोस्तु ते ५१ नमो ब्रह्मण्य ३०

वि० देवाय गोब्राह्मणहिताय च जगद्धिताय कृष्णाय गोविंदाय नमो
टी० भा० नमः ५२ आकाशात्पतितं तोयं यथा गच्छति सागरं सर्वदेव न
३१ मस्कारः केशवं प्रतिगच्छति ५३ एष निःकंटकः पंथा यत्र संपू
३। ज्यते हरिः कुपंथं तं विजानीयाद्गोविंद रहितागमं ५४ सर्ववे
देषु यत्पुण्यं सर्वतीर्थेषु यत्फलं तत्फलं च श्रियमाप्नोति स्तुत्वा
देवं जनार्दनं ५५ यो नरः पठते नित्यं त्रिकालं केशवालये द्वि
कालमेककालं वा क्रूरं सर्वं व्यपोहति ५६ दह्यंते रिपवस्तस्य
सौम्याः सर्वे सदा ग्रहाः विलयं यांति च पापानि तवेशास्मिन्
प्रकीर्तिते ५७ येन ध्यातं श्रुतं तेन यनायं पठितं स्तवं दत्ता
नि सर्वदानानि सुराः सर्वे समर्चिताः ५८ इहलोके परे वापि न वि०
भयं विद्यते क्वचित् नाम्नां सहस्रं योधीते द्वादश्यां मम सं ३१

वि॰ न्निधौ ५९ सनिर्दहति पापानि कल्पकोटिशतानि च ॥ अ
श्वत्थसन्निधौ पार्थ ध्यात्वा मनसि केशवं ६० पठेन्नामसह
स्रं तु गवां कोटि फलं लभेत् ॥ शिवालये पठेन्नित्यं तुलसी
वनसंस्थितः ६१ नरो मुक्तिमवाप्नोति चक्रपाणेः वचो
यथा ॥ ब्रह्महत्यादिकं पापं सर्वं पापं विनश्यति ६२

इति श्री महाभारते शतसहस्र संहितायां
वैय्यासिक्यां शांति पर्व्वणि उत्तमानु
शासने दानधर्म्माननेरे श्रीविष्णो
र्दिव्य सहस्रनामस्तोत्रं

वि॰
३२